National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 363-367
© 2026 NJHSR
www.sanskritarticle.com

**Gopal Krushna Dash**
Research Scholar,
Vyakaran Vidyashakha,
CSU, Shri Sadashiva Campus, Puri

**Sr. Prof. Anupama Prusty**
Supervisior,
HOD, Vyakaran Vidyashakha,
CSU, Shri Sadashiv Campus, Puri

**Correspondence:**
**Gopal Krushna Dash**
Research Scholar,
Vyakaran Vidyashakha,
CSU, Shri Sadashiva Campus, Puri

# पाणिनीयव्याकरणे रणनीतिकप्रबन्धनस्य स्वरूपविश्लेषणम्

(An Analysis of the Intrinsic Nature of Strategic Management in Pāṇinian Grammar)

**Gopal Krushna Dash , Sr. Prof. Anupama Prusty**

**शोधसारः(Abstract)**

इह खलु महर्षिपाणिनिप्रणीताष्टाध्याय्याः केवलं वागनुशासनत्वमतिक्रम्य 'सार्वभौमरणनीति-कप्रबन्धनतन्त्र'त्वेन (Strategic Management) शास्त्रीया मीमांसाऽस्मिन् शोधपत्रे विधीयते। साम्प्रतिक-प्रबन्धनशास्त्रस्य पञ्चापि प्रक्रमाः लक्ष्यावधारणं परिवेशपरीक्षणं नीतिप्रणयनं विनियोजनं बाधानियन्त्रणञ्च तत्र 'उत्सर्गापवाद-अनुवृत्ति-अधिकार-परिभाषा'दिन्यायैः सहस्राब्दिपूर्वमेव सुप्रतिष्ठिता इति सप्रमाणं साध्यते। अन्तरङ्गबहिरङ्गबहुलप्रणालीभिः सुसम्पन्नेयं निर्दोषा स्वयञ्चालित-व्यवस्था (Automated Framework) न केवलं शब्दसाधुत्वे प्रत्युत आधुनिकसङ्घटनानां स्थायित्वे भविष्यतः कृत्रिममेधासञ्चालने च शाश्वतं मार्गदर्शकसूत्रम् (Blueprint) इति लेखस्यास्य परमो निर्गलनार्थः।

**प्रस्तावना(Introduction)**

यदेतल्लोके प्रबन्धनमिति शब्दवाच्यं वस्तु समुपलभ्यते तस्य तात्त्विकं स्वरूपं विचार्यमाणं सत् केवलं कतिपयवाणिज्यक्रियाकलापमात्रनिष्ठं न भवति अपि तु निखिलब्रह्माण्डवर्तिनां चेतनाचेतनानां पदार्थानां सुव्यवस्थितसञ्चालनहेतुभूता काचिदनिर्वचनीया मेधाशक्तियुक्ता सार्वत्रिकी प्रक्रियैवेति विज्ञेयम्। अर्थशास्त्रपरिभाषादृष्ट्या तावत् कस्यापि निश्चितोद्देश्यस्य सम्पादनाय साधनानां समूहीकरणं नियोजनं सञ्चालनं परीक्षणं चेति यच्चतुष्टयं वर्तते तदेव प्रबन्धनस्य मुख्यं लक्षणमुररीक्रियते[1]। तच्च प्रबन्धनं विविधरूपेण भिद्यते अकाण्डे विप्रकीर्णत्वात् सर्वत्र प्रसरति च यथा वित्तप्रबन्धनं मानवसंसाधनप्रबन्धनं विपरिवर्तनप्रबन्धनम् उत्पादनप्रबन्धनं चेति। परन्तु एतन्मानवबुद्धिकौशलं न हि केवलं पण्यवीथिकासु वा आधुनिकनिगमसङ्घटनेष्वेव चरितार्थं भवति यतो हि जगति कस्यापि व्यष्टेः समष्टेः वा जीवनयात्रायां प्रबन्धनस्य परोक्षापरोक्षरूपेण व्याप्तिः सर्वसम्मतैवेति। ऋग्वेदीये पुरुषसूक्ते यः सृष्टिप्रक्रियायाः यज्ञरूपेण विन्यासः श्रूयते सोऽपि कश्चिदलौकिकः प्रबन्धनप्रकार एव यत्र साध्याः देवाः ऋषयश्च यज्ञानुष्ठानेन वैश्विकसंसाधनानां सम्यङ्नियोजनं कृत्वा अस्य ब्रह्माण्डतन्त्रस्य चक्रं प्रवर्तितवन्तः[2]। तत्र च प्रबन्धनस्य सकलेषु भेदेषु व्यूहरचनात्मकं रणनीतिकं वा प्रबन्धनं नाम सर्वमूर्धन्यत्वेन विराजते यतो हि एतद् विना कस्यापि दीर्घकालिकस्य महतः सङ्घटनस्य अस्तित्वरक्षणं सर्वथा असम्भवप्रायमेव सम्पद्यते। रणनीतिकप्रबन्धनं नाम न केवलं तात्कालिकानां समस्यानां निवारणमात्रं अपि तु सुदीर्घं भविष्यत्कालमभिलक्ष्य सम्भाव्यमानानां बाह्यविपदां आन्तरिकसामर्थ्यानां च सूक्ष्मातिसूक्ष्मं पर्यालोचनं विधाय कस्यचिदप्रकम्प्यस्य लक्ष्यस्य प्राप्तये शाश्वतसिद्धान्तानां निर्माणम्। इदमत्र अवधेयमस्ति यद् आधुनिके व्यापारयुगे याः संस्थाः स्वकीयां दूरदृष्टिं कार्योद्देश्यं च निश्चित्य तदनुगुणं स्वकीयकार्यप्रणालीं विकसयन्ति ता एव जगति चिरं स्थातुं शक्नुवन्ति अन्यथा तु कालप्रवाहेण तासां नाममात्रावशेषो भवति इति प्रबन्धनशास्त्रविदः मन्यन्ते।

अस्मिन्नेव महति सन्दर्भे साम्प्रतिके जगति भारतीयज्ञानपरम्परायाः सर्वविषयव्यापकत्वं महत्त्वं च नितरामकाण्डे एव समालोच्यते यतो हि इयं परम्परा केवलं आध्यात्मिकविषयान् एव न स्पृशति अपि तु आधिभौतिकानां व्यावहारिकविज्ञानानामपि परां कोटिं प्रकटीकरोति। एतस्यां च ज्ञानसरस्वत्यां महर्षिपाणिनिप्रणीतं व्याकरणशास्त्रं मूर्धन्यं स्थानं भजतेतराम्। इदं व्याकरणं न केवलं केषाञ्चित्पदानां साधुत्वप्रतिपादनमात्रपरं नापि केवलं शब्दप्रक्रियामात्रसीमितं सङ्केततन्त्रं वर्तते अपि तु सर्वशास्त्रोपकारकत्वात् अस्य स्थानं सर्वोपरि विद्यते। महाभाष्यकारेण भगवता पतञ्जलिना स्पष्टमेव

उद्घोषितं यद् व्याकरणं नाम प्रधानं च षट्स्वङ्गेषु प्रधानं च कार्यसाधकं भवति प्रधाने च कृतो यत्नः फलवान् भवतीति[3]। यदि वयं पाणिनीयायाः अष्टाध्याय्याः संरचनां प्रबन्धनशास्त्रीयदृष्ट्या सूक्ष्मेक्षिकया पश्यामः तर्हि तत्र कश्चिद् विस्मयकरो दीर्घकालिकः कार्यसिद्धिहेतुभूतः रणनीत्यात्मकः प्रबन्धः समुपलभ्यते। पाणिनिना हि अनन्तस्यापि शब्दसागरस्य नियमनाय या अव्यभिचारिणी अष्टभिरध्यायैः गुम्फिता चतुःसहस्रसूत्रात्मकी कार्यप्रणाली विरचिता सा कस्यापि कुशलप्रबन्धकस्य कृते परमादर्शभूता। अत्र हि न केऽपि यादृच्छिकाः प्रक्रमाः अपि तु सर्वेऽपि विधयः सुचिन्तिताः सुनियोजितश्च सन्ति। पारिभाषिकाणां संज्ञानां पूर्वमेव विन्यासः ततः शिवसूत्रैः संशाधनानां वर्गीकरणं तदनु प्रत्याहारमाध्यमेन तस्य सङ्कोचनं च सर्वमिदं आधुनिकसङ्गणकविज्ञानस्य डेटा-कम्प्रेशन प्रणाल्याः तथा च प्रबन्धनशास्त्रस्य आप्टिमाइजेशन् सिद्धान्तस्य परां काष्ठां सूचयति[4]। अत एव पाणिनीयव्याकरणं न केवलं शब्दसंस्कारकम् अपि तु मानवीयायाः प्रज्ञायाः रणनीतिक-प्रबन्धनस्य च जगति सर्वोत्तमः आदर्शग्रन्थः इति वक्तुं युज्यते यस्य दीर्घकालिकसफलता अद्यापि अव्याहता वर्तते।

अत्रेदं गम्भीरतया समालोचनीयं वर्तते यदियं सकलभुवन-तलमण्डनीभूता महती भारतीया ज्ञानपरम्परा न केवलं पारलौकिकपरमार्थमात्रगोचरा नापि केवलं क्रियाकाण्डानुष्ठानमात्र-विश्रान्ता वर्तते अपि तु निखिलविद्यानां कलानां च व्यावहा-रिकविज्ञानानां परमप्रतिष्ठास्थानमस्तीति सम्यगवगन्तव्यम्। तस्यां च ज्ञानपरम्परायां व्याकरणशास्त्रस्य सर्वशास्त्रोपकारकत्वं सर्वतन्त्रस्वतन्त्रत्वं च शास्त्रान्तरकारैः एककण्ठ्येन उररीक्रियते यतः शब्दार्थसम्बन्धव्युत्पत्तिं विना न किमपि शास्त्रं स्वकीय-प्रतिपाद्यविषयं विवरितुं प्रभवति। इत्थं च वेदपुरुषस्य मुखत्वेन परिगणितं पाणिनीयतन्त्रं न्यायमीमांसादिदर्शनतन्त्राणाम् आधार-शिरोमणिभूतं सत् सकलवाङ्मयस्य नियामकत्वेन विजृम्भते। यदुक्तं वाक्यपदीये शब्दप्रकृतिकानां सर्वविद्यानां व्याकरणमेव निबन्धन-मिति तदनेनैव आशयेन चरितार्थं भवति[5]। यच्च आधुनिकैः पाश्चात्यैः कतिपयैः विद्वद्भिः समालोच्यते यद् व्याकरणमिदं केवलं पदसंस्का-रमात्राय प्रवृत्तं किमपि यान्त्रिकतन्त्रं वा केवलं शब्द-प्रक्रियानियमककेन्द्रीकृतनियमसङ्ग्रहः इति तदतिस्थवीयः प्रज्ञाविजृम्भितं यतो ह्यत्र केवलं वर्णोत्पत्तिप्रक्रिया न निर्दिश्यते अपि तु अनन्तानां लक्ष्याणां सङ्ग्रहाय कश्चिदपूर्वो दीर्घकालि-कप्रबन्धनसिद्धान्त एव बीजरूपेण संस्यूतो वर्तते[6]। महर्षेपाणिनेः अष्टाध्याय्याम् एकं सुदीर्घकालं व्याप्य सफलताप्रदायिन्याः लक्ष्यावाप्तिपद्धतेः यत् सूक्ष्मदर्शनं जायते तत् कस्यापि आधुनिकप्रबन्धनशास्त्रज्ञस्य प्रज्ञामतिशाययति। अस्मिन् तन्त्रे हि प्रातिपदिकधातुप्रत्ययानां सम्यग्वियोजनेन नूतनपदसृष्टौ च या कापि सुनियन्त्रितेतरान्विता व्यूहरचना विहिता सा चिरन्तनकालपर्यन्तं व्यवहारे अबाधितत्वात् चिरस्थायिसफलतायाः उत्कृष्टतमं निदर्शनं प्रस्तुतीकरोति। अस्मिन् हि व्यवहारे न केवलं तात्कालिकानां रूपाणां सिद्धिः अभिप्रेता अपि तु आगमिष्यतां सहस्रशः वर्षाणां भाषापरिवर्तनतरङ्गेष्वपि अस्य तन्त्रस्य अव्याहतत्वं यथा स्यात् तादृशी दूरदर्शिता पुरस्कृता वर्तते यैव रणनीतिकप्रबन्धनस्य चरमा कोटिरिति निपुणमुद्घोष्यते।

**विषयः**

**रणनीतिकप्रबन्धनप्रक्रियायास्तात्त्विकसमीक्षा विविधाचार्याणां सिद्धान्तविमर्शश्च**

इह खलु सकलसृष्टिप्रपञ्चसञ्चालिका काचिदनिर्वचनीया चेतनश-क्तिरेव प्रबन्धनशब्देन व्यपदिश्यते। न चैतन्मात्रं पण्यव्यवहार-पर्यवसितं कञ्चिद्वाणिज्यिकप्रकारं वक्तुं युक्तमपि तु निखिल-ब्रह्माण्डवर्तिनां कार्याणां सुव्यवस्थितसङ्गतये कश्चिदपरिहार्यः सार्वभौमः सिद्धान्तः। यथैव हि शिक्षाशास्त्रे बेञ्जामिन-ब्लूममहोदयस्य संज्ञानात्मकस्तरीकरणसिद्धान्ते ज्ञानावाप्तिमारभ्य मूल्याङ्कनपर्यन्ताः क्रमिकाः स्तराः प्रज्ञां नियमयन्ति तथैव प्रबन्धनशास्त्रेऽपि निखिलक्रियाकलापानां क्रमिकनियोजनेन लक्ष्यप्राप्तिः सम्पाद्यते[7]। माइकलपोर्टरमहाभागेनापि स्वकीये प्रति-स्पर्धात्मकसिद्धान्ते यदुक्तमन्येभ्यः पृथग्भूय विशिष्टमूल्यसृजनमेव वास्तविकपरमसाध्यमिति तदपि प्रबन्धनस्यैव व्यापकरूपं दृढयति यतः कस्यापि व्यवस्थाया उत्कर्षस्तदीयायामनन्यतायामेव विश्राम्यति। यदि प्रबन्धनमिदं जगति न स्यात्तर्हि सर्वत्राप्यृतभङ्गप्रसङ्गेन जगद्व्यवस्था समूलं विदीर्येत। प्रबन्धनाभावे हि सङ्घटनस्य लक्ष्यच्युतिः संसाधनानां च निरर्थको व्ययो जायते येन मात्स्यन्यायावतारो नियतः सम्पद्यते। नियामकशून्यं जलयानमिव किमपि कार्यं प्रबन्धनेन विना विनाशाग्रावहुर्तिं प्रविशति। अत एव राजकीयप्रशासने शैक्षिकसङ्घटने सामरिकप्रशासने नैसर्गिकप्रपञ्चे च सर्वत्रैवास्य रणनीतिकप्रबन्धनस्य प्राणाधायिकं महत्त्वं चकास्ति। आधुनिकीषु विश्वविद्यालीयासु शिक्षापरम्परासु प्रबन्धनशास्त्रस्य ये प्रामाणिका ग्रन्थाः पाठ्यन्ते तेषु प्रामुख्येन आर्थरथॉम्पसन् तथा एजेस्ट्रिकलैण्ड इत्येतयोः प्रणीतो ग्रन्थे “Crafting and Executing Strategy” इति तथा च फ्रेड आर डेविड् महोदयस्य “Strategic Management Concepts and Cases” इति ग्रन्थः सुप्रसिद्धो विद्यते। एतयोर्ग्रन्थयोराधारमेव स्वीकृत्य कस्यापि महतः सङ्घटनस्य साफल्याय रणनीतिकप्रबन्धनस्य पञ्च प्रमुखाणि सोपानानि निर्दिश्यन्ते येषां क्रमिकान्वयेनैवोद्देश्यानां परिसमा-प्तिराधायते।

**प्रथमं सोपानम् रणनीतिकदूरदृष्टिनिर्धारणपूर्वकं लक्ष्यसङ्कल्पः [Developing Strategic Vision and Objectives]**

कस्यापि कार्यस्य प्रवृत्तौ प्रथमं तावत्तस्य कार्यस्य कः सुदूरप्रसारी परिणामो भवेदिति दूरदृष्टेर्निश्चयः क्रियते। तदनु सा दूरदृष्टिः कथं व्यावहारिकधरातले आनेतव्या इत्यस्य कार्यध्येयस्य निश्चयः क्रियते यस्माच्च विशिष्टानां मापनयोग्यानां लक्ष्याणां जन्म भवति। लक्ष्यसङ्कल्प एव सकलकार्यस्य बीजं भवति यतो हि गन्तव्यमज्ञात्वा प्रवृत्तः पान्थो न कुत्रचिदपि गन्तुं प्रभवति।

**द्वितीयं सोपानम् बाह्यपरिस्थितिपरिज्ञानं संसाधनसमीक्षणञ्च [Environmental Scanning and SWOT Analysis]**

लक्ष्यनिर्धारणे कृते सति कस्यां परिस्थितौ कार्यं करणीयमिति बाह्यपर्यावरणस्यान्तरिकसामर्थ्यस्य च सूक्ष्मवीक्षणं द्वितीयं सोपानं वर्तते। प्रबन्धनशास्त्रे एतदेव बलदौर्बल्यावसरसङ्कटचतुष्टयीनिरूप-णमिति [SWOT Analysis] कथ्यते यत्रान्तरिकीं शक्तिं ज्ञात्वा बाह्यजगति विद्यमानावसराणां परीक्षा विधीयते। अस्य सोपानस्याभावे काल्पनिकलक्ष्याणि धरातले भज्यन्ते।

**तृतीयं सोपानम् रणनीतिप्रणयनं वैशिष्ट्याधानञ्च [Strategy Formulation]**

परिस्थितिं सम्यक् परिज्ञाय लक्ष्यावाप्तये को मार्गः सर्वोत्तम इत्यनेकविकल्पेष्वेकस्य विशिष्टमार्गस्य चयनं रणनीतिरचनासोपानं वर्तते। अत्र हि संसाधनानां विनियोजनं कथं स्यादिति निर्णीयते। अस्मिन्नेव प्रक्रमे व्यवस्थायां कस्यचिदभेद्यवैशिष्ट्यस्याधानं क्रियते येन सर्वथा विजयः सुनियतो भवति।

**चतुर्थं सोपानम् रणनीतिकार्यान्वयनं विनियोजनञ्च [Strategy Implementation]**

निर्मिताया रणनीतेर्व्यावहारिकधरातले दृढं कार्यान्वयनं चतुर्थं सोपानं मन्यते यच्च समग्रप्रक्रियायां सर्वतोऽधिकं क्लेशकरं भवति। संरचनाया बजटप्रणाल्याश्चानुकूलनं कृत्वैवैतत् सम्पाद्यते। विचाराणां कर्मणि रूपान्तरणमेवात्र सम्पाद्यते यतो हि कार्यान्वयनमन्तरेण सूक्ष्मापि नीतिर्वन्ध्यैवावतिष्ठते।

**पञ्चमं सोपानम् रणनीतिमूल्याङ्कनं दोषपरिशोधनात्मकं नियन्त्रणञ्च [Strategy Evaluation and Control]**

अन्तिमञ्च सोपानं निर्धारितपरिमाणैः सह वास्तविकफलानां तुलनापूर्वकं क्रियमाणं मूल्याङ्कनं भवति। यदि कस्मिंश्चिद्भागे विचलनं [Deviation] दृश्यते तर्हितस्य निवारणाय संशोधनात्मका उपायाः क्रियन्ते येन व्यवस्था कुमार्गान्निवृत्ता सती सुमार्गे प्रतिष्ठिता तिष्ठति।

**प्रबन्धनसोपानानां युगपत्प्रवृत्तिः**

एतेषां पञ्चसोपानानां साफल्यं न केवलं वाणिज्यक्षेत्रे अपि त्वन्येष्वपि क्षेत्रेषु युगपदेव सञ्चाल्यमानं समुपलभ्यते यद्धि प्रबन्धनस्य सार्वभौमत्वं प्रमाणीकरोति। तद्यथा प्रथममुदाहरणमन्तरिक्षगवेषणक्षेत्रे [Space Exploration] दृश्यते। भारतीयमन्तरीक्षानुसन्धानसङ्घटनम् [ISRO] यदा चन्द्रयानम् प्रेषयति तदा प्रथमं चन्द्रतलस्पर्शनरूपं लक्ष्यं [Strategic Vision] निर्धार्यते। ततो बाह्यान्तरिकपरिस्थितीनां गुरुत्वाकर्षणादीनां ज्ञानं [Environmental Scanning] क्रियते। तदनु मार्गस्य तान्त्रिकयोजना [Strategy Formulation] निर्मीयते। ततश्च यानस्य प्रक्षेपणरूपं कार्यान्वयनम् [Implementation] विधीयते। अन्ते च मार्गविचलननिवारणाय यन्त्रमाध्यमेन नियन्त्रणं [Evaluation and Control] क्रियते येन यानं सम्यक् लक्ष्यं प्राप्नोति।

एवमेव द्वितीयमुदाहरणं चिकित्साशास्त्रे [Medical Science] समुपलभ्यते। कस्यापि क्लिष्टस्य शल्यकर्मणः [Surgical Operation] प्रवृत्तौ चिकित्सकः प्रथमं रोगनिवारणरूपं लक्ष्यं [Objective] निश्चित्य ततः शरीरावस्थाया यन्त्रैः परीक्षणं [Scanning] कृत्वा चिकित्सापद्धतेर्निश्चयो [Formulation] विधीयते ततश्च शस्त्रकर्म [Implementation] सम्पाद्य रोगिणः स्वास्थ्यस्य मूल्याङ्कनम् [Evaluation] क्रियते।

तृतीयमुदाहरणञ्च सामरिकप्रशासने [Military Strategy] सुस्पष्टं भवति। युद्धे हि प्रथमं शत्रुपराजयो लक्ष्यत्वेन [Vision] कल्प्यते ततः शत्रोर्बलस्य भौगोलिकस्थितेश्च परीक्षणं [SWOT Analysis] भवति तदनु सेनापतिना चक्रव्यूहादीनां रचना [Formulation] विधीयते ततो युद्धप्रवर्तनम् [Implementation] भवति अन्ते च शत्रुचेष्टानुरूपं स्वसेनायां परिवर्तनं [Control] क्रियते।

चतुर्थमुदाहरणञ्च विद्यावारिधिशोधकार्यप्रवृत्तस्य कस्यचिद्विदुषः शोधप्रक्रियायां साक्षाद्दृश्यते। तत्र हि प्रथमं शोधच्छात्रेण कस्यचिदविदितपूर्वरहस्यस्योद्घाटनरूपं विद्यावारिध्युपाधिप्राप्तिरूपं च लक्ष्यं [Strategic Vision and Objectives] निश्चीयते। ततस्तद्विषये पूर्वसूरिभिः कृतस्य शोधकार्यस्य पर्यालोचनरूपं साहित्यसमीक्षणम् उपलब्धसाधनानां स्वसामर्थ्यस्य च सूक्ष्मवीक्षणम् [Environmental Scanning and SWOT Analysis] क्रियते। तदनु शोधप्रविधेर्निर्धारणं [Research Methodology] कृत्वा प्रबन्धस्य रूपरेखारूपरणनीतिर्विधीयते [Strategy Formulation]। ततश्च प्रमाणसङ्कलनपूर्वकं ग्रन्थलेखनरूपं कार्यान्वयनम् [Strategy Implementation] सम्पाद्यते। अन्ते च मार्गदर्शकाचार्येण सह नैरन्तर्येण परामर्शं कृत्वा स्खलितानां निवारणरूपं दोषपरिशोधनात्मकं नियन्त्रणम् [Evaluation and Control] विधीयते येन शोधप्रबन्धः सम्यक्तया पूर्णतां गच्छति।

इत्थं हि सर्वत्रैव जगति रणनीतिकप्रबन्धनमपरोक्षतया विलसति[8]।

**पाणिनीयतन्त्रे रणनीतिकप्रबन्धनस्य सोपानानां समन्वयः [Integration of Strategic Management Steps]**

इदानीं महर्षेः पाणिनेः अष्टाध्यायीप्रपञ्चं प्रबन्धनशास्त्रीयनिकषे परीक्षमाणा विद्वांसः तत्र तान् सर्वानपि प्रक्रमान् परिष्कृततरेण रूपेण पश्यन्ति ये हि आधुनिकैः मनीषीभिः महता प्रयासेन निरूपिताः सन्ति। शास्त्ररीत्या विचार्यमाणे पाणिनीयव्याकरणं न केवलं शब्दसाधुत्वप्रतिपादकम् अपि तु कस्यचित् सुदीर्घकालिकस्य तन्त्रस्य निर्माणाय विरचिता काचिदमोघा रणनीतिकप्रक्रिया वर्तते।

**१. रणनीतिकदूरदृष्टिः लक्ष्यसङ्कल्पश्च [Strategic Vision and Goal Setting]**

महर्षेः पाणिनेः पुरतः प्रथमं तावत् निखिलस्य लौकिकस्य वैदिकस्य च शब्दप्रपञ्चस्य साधुत्वासाधुत्वविवेकपूर्वकं नियमनं परमं लक्ष्यम् [Strategic Vision] आसीत्। एतदर्थमेव तेन 'शब्दानुशासनम्' इति प्रतिज्ञा कृता। इयं च चिकीर्षा आधुनिकप्रबन्धनस्य कार्यध्येयसङ्कल्पात् [Mission Statement] सर्वथा अतिशायिनी वर्तते यतो ह्यत्र कस्यापि कालखण्डविशेषस्य कृते नियमनिर्माणं नासीत् अपि तु त्रिकालबाधितस्य शब्दब्रह्मणः सुव्यवस्थितसञ्चालनमेव परममुद्देश्यम् आसीत्[9]।

**२. परिस्थितिपरिज्ञानं संशाधनसमीक्षणञ्च [Environmental Scanning and SWOT Analysis]**

लक्ष्यसङ्कल्पानन्तरं पाणिनिना तदानीन्तने वाङ्मये विद्यमानानां सर्वप्रकाराणां ध्वनीनां भाषाप्रवाहाणां प्रादेशिकप्रयोगाणां च सुसूक्ष्मं वीक्षणं कृतम्। स हि पूर्वाचार्याणां मतानां सम्यक् पर्यालोचनं कृत्वा समग्रं वर्णसमाम्नायं चतुर्दशसु शिवसूत्रेषु संहितवान्। एष एव पाणिनीयतन्त्रस्य संशाधनसङ्ग्रहः [Data Repository / Resource Inventory] यः आधुनिकप्रबन्धनस्य बाह्यपरिस्थितिज्ञान [Environmental Scanning] सदृशः। अत्रैव महर्षिणा लौकिकभाषायाः सामर्थ्यं वैदिकभाषायाश्च विशिष्टतां ज्ञात्वा स्वकीयव्यूहस्य रचना कृता[10]।

**३.रणनीतिप्रणयनं तान्त्रिकसंरचना च [Strategy Formulation]**

यदा वर्णसमाम्नायस्य संशाधनानि सिद्धानि तदा महर्षिणा तेषां सङ्कोचविकासाभ्यां शब्दनिष्पादनाय सूत्राणां रचना प्रारब्धा। एतदेव रणनीतिप्रणयनं [Strategy Formulation] कथ्यते। अत्र पाणिनिना संज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकारभेदेन षड्विधसूत्राणां तादृशी संरचना कृता यया अनन्ताः शब्दाः स्वल्पैरेव नियमैः सिद्धाः भवेयुः। प्रत्याहारनिर्माणमाध्यमेन महती सामग्री सङ्कुचिता कृता यद्धि प्रबन्धनशास्त्रोक्तं न्यूनतमव्ययेन कार्यसाधनम् [Operational Efficiency / Cost Optimization] इति सिद्धान्तं चरितार्थं करोति[11]।

**४.रणनीतिकार्यान्वयनं प्रक्रियापद्धतिश्च [Strategy Implementation]**

प्रणीतायाः रणनीतेः वास्तविकं क्रियान्वयनं पाणिनीयप्रक्रियापद्धतौ [Derivational Process] साक्षात् क्रियते। यदा कश्चिद् विवक्षितः अर्थः उपतिष्ठते तदा धातु-प्रातिपदिक-प्रत्ययानां संयोजनं विधाय तन्त्रस्य सञ्चालनं भवति। अत्र हि प्रकृत्या सह प्रत्ययानां योजनं ततः

आगम-आदेश-लोप-विकरणादीनां क्रमबद्धं प्रवर्तनं च रणनीतिकार्यान्वयनस्य [Strategy Implementation] तमुत्कृष्टं प्रक्रमं दर्शयति यत्र कोऽपि नियमः स्वकीयं स्थानं कालञ्च न जहाति। इयमेव पाणिनीया शब्दनिर्माणशाला [Linguistic Conveyor Belt] इति विज्ञेयम्[12]।

**५. रणनीतिमूल्याङ्कनं स्वचालितनियन्त्रणञ्च [Strategy Evaluation and Control]**

प्रक्रियादशायां यदा नियमानां परस्परं द्वन्द्वः सञ्जायते तदा व्यवस्थाया रक्षणाय पाणिनिना स्वचालितनियन्त्रणप्रणाली [Automated Control Mechanism] स्थापिता। 'विप्रतिषेधे परं कार्यम्' इति सूत्रं तथा च त्रिपाद्यां 'पूर्वत्रासिद्धम्' इति नियमः रणनीतिमूल्याङ्कनस्य नियन्त्रणस्य च [Evaluation and Control] तां परां काष्ठां सूचयति यत्र मानवहस्तक्षेपं विना व्यवस्था स्वतः एव दोषाणां परिहारं कृत्वा शुद्धं परिणामं प्रसूते।

**पाणिनीयतन्त्रे रणनीतिकप्रबन्धनस्य व्यावहारिकमुदाहरणम् [Practical Case Studies of Strategic Management in Paninian Grammar]**

यथा आधुनिकप्रबन्धने सैद्धान्तिकनियमानां व्यावहारिकधरातले परीक्षणं भवति तथैव पाणिनेः अष्टाध्यायी यन्त्रवत् कार्यं करोति। अत्र प्रबन्धनस्य पञ्चसोपानानि आश्रित्य उदाहरणानि [Case Studies] प्रस्तूयन्ते येषु प्रथमं सन्धिकार्यस्य द्वितीयं तिङन्तरूपस्य तृतीयञ्च समासप्रक्रियायाः अस्ति।

**प्रथममुदाहरणम् — यण्सन्धिप्रक्रिया (सुद्ध्युपास्यः, मध्वरिः, धात्रंशः, लाकृतिः)**

पाणिनीयतन्त्रे वर्णानां संयोजनेन शब्दनिष्पादनं [Product Development] कथं भवति इत्यस्येदम् उत्कृष्टमुदाहरणम्।

**१. लक्ष्यसङ्कल्पः [Strategic Goal / Objective Setting]**

'सुधी + उपास्यः', 'मधु + अरिः', 'धातृ + अंशः', 'लृ + आकृतिः' इत्येतेषां पृथक् स्थितानां पदानां संयोजनेन एकीकृतस्य निर्दोषस्य पदस्य (सुद्ध्युपास्यः, मध्वरिः इत्यादेः) निष्पादनम् एव अत्र परमं लक्ष्यं वर्तते।

**२. परिस्थितिपरिज्ञानम् [Environmental Scanning and Context Analysis]**

सङ्घटने यथा आन्तरिकबाह्यशक्तीनां मापनं भवति तथैव अत्र वर्णानां स्थितेः परिज्ञानं [Scanning] क्रियते। तद्यथा — 'सुधी + उपास्यः' अत्र पूर्वपदान्ते 'ई' (इक्-प्रत्याहारः) वर्तते तथा च उत्तरपदस्य आदौ 'उ' (अच्-प्रत्याहारः) वर्तते। अनयोः सामीप्यं (संहिता) अस्ति इति पर्यावरणस्य पूर्णं ज्ञानं [Data Collection] क्रियते।

**३. रणनीतिप्रणयनम् [Strategy Formulation]:**

समस्यायाः समाधानाय अच्सन्धेः बहुषु नियमेषु सर्वोत्तमस्य नियमस्य चयनमत्र क्रियते। अतः "इको यणचि" (६.१.७७) इति प्रमुखरणनीतेः [Core Strategic Rule] प्रणयनं भवति, यया 'इक्' स्थाने 'यण्' भवेत् 'अच्' परे सति इति निश्चितम्।

**४. रणनीतिकार्यान्वयनम् [Strategy Implementation]:**

'इको यणचि' इत्यस्य साक्षात् प्रयोगः न सम्भवति यावत् साहाय्यकनियमानां [Operational Guidelines] प्रयोगो न भवेत्। अतः—

- "तस्मिन्निति निर्दिष्टे पूर्वस्य" इत्यधिकारपरिभाषया अव्यवहितपूर्वस्य 'ई' कारस्य स्थाने कार्यं कर्तव्यमिति विनियोजनम् [Execution Setup] जातम्।
- ततः "स्थानेऽन्तरतमः" इति परिभाषया [Resource Matching] 'ई' (तालुस्थानम्) इत्यस्य स्थाने 'य्' (तालुस्थानम्) इति यणादेशः कार्यान्वितः [Implemented]। (स्थितिः — सुध् + य् + उपास्यः)।

**५. रणनीतिमूल्याङ्कनं दोषनियन्त्रणञ्च [Strategy Evaluation and Control]:**

प्रक्रियामध्ये काश्चन अनपेक्षितसमस्याः [Operational Bottlenecks] उत्पद्यन्ते, यासां नियन्त्रणमत्र क्रियते—

- "अनचि च" इति सूत्रेण 'ध्' कारस्य द्वित्वं भवति (सु ध् ध् य् उपास्य)।
- ततः "झलां जश् झशि" इति नियन्त्रणनियमेन [Quality Control] पूर्वधकारस्य 'द्' भवति (सु द् ध् य् उपास्य)।
- ततः "संयोगान्तस्य लोपः" इति सूत्रेण अन्तिमस्य 'य्' कारस्य लोपे प्राप्ते सति, तस्य विनाशं रोद्धुम् "यणः प्रतिषेधो वाच्यः" इति वार्तिकेन निषेध-नियन्त्रणम् [Corrective Action / Exception Handling] क्रियते। अन्ते 'सुद्ध्युपास्यः' इति निर्दोषं पदं सिद्ध्यति।

**द्वितीयमुदाहरणम् — सुबन्तपदनिर्माणम् (रामः)**

अस्मिन् उदाहरणे कस्यचित् शब्दस्य पदत्वप्राप्तिरूपं समग्रं रूपान्तरणं [Transformation Process] दर्श्यते।

**१. लक्ष्यसङ्कल्पः [Strategic Vision]:**

'राम' इति अर्थवच्छब्दस्य वाक्ये प्रयोगार्थं 'रामः' इति सुबन्तपदरूपेण [Usable Syntactic Unit] परिणमनम्। संस्कृतवाक्ये 'अपदं न प्रयुञ्जीत' इति नियमात् अस्य लक्ष्यस्य महत्त्वं सर्वाधिकं वर्तते।

**२. परिस्थितिपरिज्ञानम् [Environmental Scanning]:**

'राम' इति शब्दः अर्थवान् अस्ति परन्तु सः धातुः नास्ति, प्रत्ययोऽपि नास्ति। अतः अस्य शब्दस्य योग्यतां ज्ञात्वा तस्य व्याकरणिकस्तरस्य निर्धारणमत्र प्रथमं सोपानमस्ति।

**३. रणनीतिप्रणयनम् [Strategy Formulation]:**

प्रथमं "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रेण अस्य प्रातिपदिकसंज्ञा [Brand Identification / Categorization] क्रियते। ततः "स्वौजसमौट्..." (४.१.२) इति रणनीतिकसूत्रेण एकत्वविवक्षायां 'सु' प्रत्ययस्य योजनं विधीयते।

**४. रणनीतिकार्यान्वयनम् [Strategy Implementation]:**

'राम + सु' इति स्थितौ कार्यान्वयनम् [Process Implementation] आरभ्यते—

- "ससजुषो रुः" (८.२.६६) इति सूत्रेण पदान्तसकारस्य स्थाने 'रुँ' आदेशः [Structural Modification] भवति। (राम + रुँ)
- ततः "उपदेशेऽजनुनासिक इत्" तथा "तस्य लोपः" इति सूत्राभ्यां 'रुँ' इत्यत्र विद्यमानस्य उकारस्य इत्संज्ञा लोपश्च भवति, येन केवलं 'र्' अवशिष्यते [Process Streamlining / Waste Elimination]। (राम् + र्)

**५. रणनीतिमूल्याङ्कनं नियन्त्रणञ्च [Strategy Evaluation and Control]:**

इदानीं 'राम् + र्' इति स्थितिः वर्तते, परन्तु वाक्ये 'र्' इत्यनेन अन्तो न युज्यते। अत्र व्यवस्थायाः अन्तिमं परिष्करणं [Final Compliance Check] क्रियते—

- "विरामोऽवसानम्" इति सूत्रेण अन्तिमवर्णस्य अवसानसंज्ञा भवति।
- ततश्च "खरवसानयोर्विसर्जनीयः" (८.३.१५) इति सूत्रेण 'र्' कारस्य स्थाने विसर्गः (ः) [Quality Polish] विधीयते। इत्थं नियन्त्रणप्रक्रियया 'रामः' इति सम्पूर्णं पदं लक्ष्यं प्राप्नोति।

पाणिनेः एतासु सर्वासु प्रक्रियासु अस्माभिः साक्षात् दृश्यते यत् प्रबन्धनस्य पञ्च सोपानानि न केवलं निगमादिषु (Corporates) प्रयुज्यन्ते, अपि तु सहस्राब्दिभ्यः पूर्वं संस्कृतव्याकरणे ततोऽपि परिष्कृतरूपेण प्रयुक्तानि आसन्। इयमेव पाणिनीयतन्त्रस्य वैज्ञानिकता सार्वभौमिकता च।

**उपसंहारः**

इत्थं खलु शब्दब्रह्मणो विमले विवर्तभूताया अष्टाध्याय्याः दार्शनिकसमीक्षां कुर्वद्भिर्विद्वद्भिः इदमवधानीयं यत् पाणिनीयतन्त्रं न केवलं व्याकरणस्य सीमारेखां स्पृशति, अपितु निखिलप्रबन्धनविज्ञानस्य परमकाष्ठां च प्रकाशयति। यत्रैकतो रणनीतिकप्रबन्धनस्य (Strategic Management) पञ्च सोपानानि साक्षात्त्वेन विलसन्ति, तत्रैव अपरतोऽसाधारणं तार्किं सौष्ठवं, परिभाषाणां न्यायसम्मतं विनियोजनं, तथा च स्वयमेव दोषाणां परिष्कारक्षमा स्वचालितनियन्त्रणप्रणाली (Automated Control Mechanism) च तस्य तन्त्रस्य युगजयीत्वं सुदृढं कुर्वन्ति। अतोऽनन्तराणि सहस्राणि वर्षाणि व्यतीतानि चेदपि, भाषावैज्ञानिकानां प्रबन्धनशास्त्रिणां च कृते एषा अष्टाध्यायी अविरतप्रवहमानस्य ज्ञानस्रोतस इव दीप्यते। भारतीयज्ञानपरम्परायामेतदेव तन्महदविस्मरणशीलं वैभवं, यत् कस्यापि निगमस्य सङ्घटनस्य वा शाश्वतसफलतायै 'मन्त्रिवत्' मार्गदर्शनं प्रदाति। उपसंहारे इदमेव वक्तुं युक्तं यत्— पाणिनीयतन्त्रस्य अनुशीलनमन्तरेण आधुनिकप्रबन्धनशास्त्रस्य परिपूर्णता कदापि न सम्भवति। पाणिनिप्रणीता एषा 'शब्दानुशासन-रणनीतिः' भविष्यति सङ्गणकयुगेऽपि मानवीयाया मेधायाः उच्चतमं प्रमाणं भविष्यति।

**सन्दर्भग्रन्थसूची (Bibliography)**


१. गणपतिशास्त्री, टी. (सम्पा.) (२०१२). *अर्थशास्त्रम्.* चौखम्भा विद्याभवन, वाराणसी.

२. गणपतिशास्त्री, टी. (सम्पा.) (१९६४). *कामन्दकीयनीतिसारः.* आनन्दाश्रम मुद्रणालय, पुणे.

३. शर्मा, आर्येन्द्रः (सम्पा.) (२००८). *काशिकावृत्तिः.* चौखम्भा संस्कृत प्रतिष्ठान, दिल्ली.

४. अभ्यङ्करः, के. वी. (सम्पा.) (२०१०). *परिभाषेन्दुशेखरः.* चौखम्भा संस्कृत संस्थान, वाराणसी.

५. शास्त्री, भीमसेनः (सम्पा.) (२०१५). *अष्टाध्यायी.* आर्ष साहित्य प्रचार ट्रस्ट, दिल्ली.

६. नेने, गोपालशास्त्री (सम्पा.) (२०१२). *व्याकरणमहाभाष्यम्.* मोतीलाल बनारसीदास, दिल्ली.

७. शर्मा, रघुनाथः (सम्पा.) (१९८९). *वाक्यपदीयम्.* चौखम्भा सुरभारती प्रकाशन, वाराणसी.

८. गोयन्दका, हरिकृष्णदासः (सम्पा.) (२०१४). *छान्दोग्योपनिषद्भाष्यम्.* गीताप्रेस, गोरखपुर.

9. Cardona, G. (1997). *Pā ṇ ini: A Survey of Research*. Motilal Banarsidas.

10. David, F. R., & David, F. R. (2016). *Strategic Management: A Competitive Advantage Approach, Concepts and Cases* (16th ed.). Pearson.

11. Kaplan, R. S., & Norton, D. P. (2001). *The Strategy-Focused Organization*. Harvard Business School Press.

12. Kiparsky, P. (1979). *Pā ṇ ini as a Variationist*. MIT Press.


**पाद टिप्पणी**

1. Drucker, Peter F. *Management: Tasks, Responsibilities, Practices*. New York: Harper & Row, Publishers, 1974, pp. 40– 45.
2. *ऋग्वेदसंहिता*, मण्डल १०, सूक्त ९०, ऋक् १६ (पुरुषसूक्तम्) — "यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्..."
3. पतञ्जलिः, *व्याकरणमहाभाष्यम्*, पस्पशाह्निकम्, चौखम्भा संस्कृत प्रतिष्ठान, दिल्ली, १९८७, पृष्ठम् १२।
4. Cardona, George. *Pā ṇ ini: A Survey of Research*. The Hague: Mouton & Co., 1976; Reprint, New Delhi: Motilal Banarsidass, 1997, pp. 140– 145.
5. भर्तृहरिः, *वाक्यपदीयम्* (ब्रह्मकाण्डम्), श्लोकः १४ — "तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्। पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥" चौखम्भा सुरभारती प्रकाशन, वाराणसी, १९८९, पृष्ठम् ३२।
6. Kiparsky, Paul. *Pā ṇ ini as a Variationist*.
7. Bloom Benjamin S Taxonomy of Educational Objectives. The Classification of Educational Goals
8. पाणिनीयव्याकरणे आधुनिकप्रबन्धनशास्त्रदृष्टिः शोधप्रबन्धः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी २०१६
9. भर्तृहरिः वाक्यपदीयम् ब्रह्मकाण्डे श्लोकः १२ चौखम्भा सुरभारती प्रकाशन वाराणसी
10. Cardona George Pā ṇ ini A Survey of Research New Delhi Motilal Banarsidass
11. पाणिनीयव्याकरणे रणनीतिकप्रबन्धनतत्त्वानां विमर्शः शोधप्रबन्धः राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः २०१८
12. Kiparsky Paul Pā ṇ ini as a Variationist Cambridge MIT Press